Lingashtakam

लिङ्गाष्टकम्

NityaPaath
nityapaath.com/lingashtakam/

SHLOKA · श्लोक

1 ब्रह्ममुरारिसुरार्चितलिङ्गं निर्मलभासितशोभितलिङ्गम्।
जन्मजदुःखविनाशकलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥

Brahma murari surarchita lingam nirmala bhasita shobhita lingam.
Janmaja duhkha vinashaka lingam tat pranamami sadashiva lingam.

2 देवमुनिप्रवरार्चितलिङ्गं कामदहं करुणाकरलिङ्गम्।
रावणदर्पविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥

Deva muni pravararchita lingam kama daham karuna kara lingam.
Ravana darpa vinashana lingam tat pranamami sadashiva lingam.

3 सर्वसुगन्धिसुलेपितलिङ्गं बुद्धिविवर्धनकारणलिङ्गम्।
सिद्धसुरासुरवन्दितलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥

Sarva sugandhi sulepita lingam buddhi vivardhana karana lingam.
Siddha surasura vandita lingam tat pranamami sadashiva lingam.

4 कनकमहामणिभूषितलिङ्गं फणिपतिवेष्टितशोभितलिङ्गम्।
दक्षसुयज्ञविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥

Kanaka maha mani bhushita lingam phanipati veshtita shobhita lingam.
Daksha suyajna vinashana lingam tat pranamami sadashiva lingam.

5 कुङ्कुमचन्दनलेपितलिङ्गं पङ्कजहारसुशोभितलिङ्गम्।
सञ्चितपापविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥

Kunkuma chandana lepita lingam pankaja hara sushobhita lingam.
Sanchita papa vinashana lingam tat pranamami sadashiva lingam.

6 देवगणार्चितसेवितलिङ्गं भावैर्भक्तिभिरेव च लिङ्गम्।
दिनकरकोटिप्रभाकरलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥

Deva ganarchita sevita lingam bhavair bhaktibhir eva cha lingam.
Dinakara koti prabhakara lingam tat pranamami sadashiva lingam.

7 अष्टदलोपरि वेष्टितलिङ्गं सर्वसमुद्भवकारणलिङ्गम्।
अष्टदरिद्रविनाशितलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥

Ashta dalopari veshtita lingam sarva samudbhava karana lingam.
Ashta daridra vinashita lingam tat pranamami sadashiva lingam.

8 सुरगुरुसुरवरपूजितलिङ्गं सुरवनपुष्पसदार्चितलिङ्गम्।
परात्परं परमात्मकलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्॥

Suraguru suravara pujita lingam suravana pushpa sadarchita lingam.
Paratparam paramatmaka lingam tat pranamami sadashiva lingam.

PHALASHRUTI · फलश्रुति

9 लिङ्गाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥

Lingashtakam idam punyam yah pathech chhiva sannidhau.
Shivalokam avapnoti Shivena saha modate.

Text checked against: Gita Press, Gorakhpur: Shiv Stotra Ratnakar, Sanskrit text with Hindi translation. Meanings, audio and all scripts at nityapaath.com/lingashtakam/